मन्मथ।
"अनुभूतं प्रियादिनामर्थानां चिन्तनं स्मृतिः।
तत्र कम्पाङ्गवैवर्ण्यवाष्पनिश्वसितादयः॥"
इत्युज्ज्वलनीलमणिः॥

तत्पर्य्यायः। चिन्ता २ आध्यानम् ३। इत्यमरः। १।७।२८॥ चिन्तिया ४। इति भरतधृतरभसः॥ चिन्तः ५। इति चौरस्वामी॥ आध्या ६। इति रामाश्रमः॥ चिन्तितिः ७ ध्यानम् ८। इति शब्दरत्नावली॥ स्मरणम् ९ चर्च्चा १०। इति जटाधरः॥ सा तु गर्भस्थस्य अष्टभिर्मासैर्भवति। इति सुखबोधः॥ * ॥ स्मृतिकारकौषधं यथा,—
"शङ्खपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्च्चला।
अभया च गुडूची च अटरूषकवाकुची॥
एतैरक्षसमैर्भागैर्घृतं प्रस्थं विपाचयेत्।
कण्टकार्य्या रसं प्रस्थं दत्त्वा च समन्वितम्॥
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम्॥"
इति गारुडे १९८ अध्यायः॥ * ॥

मन्वादिमुनिप्रणीतशास्त्रविशेषः। स्मरन्ति वेदमनया स्मृतिः। महर्षिभिर्वेदार्थचिन्तनं स्मृतिः। तद्योगात् ग्रन्थोऽपि स्मृतिरिति मुकुटः। स्मृतिकर्त्तॄणां नामानि धर्म्मशास्त्रशब्दे द्रष्टव्यानि। तत्र मनोः स्मृतेः प्राधान्यम्। यथा,—
"वेदार्थोपनिबन्धृत्वात् प्राधान्यं हि मनोः स्मृतम्।
मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते॥"
इतिकुल्लूकभट्टधृतवृहस्पतिवचनम्॥

तत्पर्य्यायः। धर्म्मसंहिता २। इत्यमरः। १।६।६॥ धर्म्मशास्त्रम् ३। इति जटाधरः॥ संहिता ४ श्रुतिजीविका ५। इति शब्दरत्नावली॥ स च सात्त्विकराजसतामसभेदेन त्रिविधः। यथा,—
"तथैव स्मृतयः प्रोक्ता ऋषिभिस्त्रिगुणान्विताः।
सात्त्विका राजसाश्चैव तामसाः शुभदर्शने॥
वाशिष्ठं चैव हारीतं व्यासं पाराशरं तथा।
भारद्वाजं काश्यपञ्च सात्त्विका मुक्तिदाः शुभाः॥
च्यावनं याज्ञवल्क्यञ्च आत्रेयं दाक्षमेव च।
कात्यायनं वैष्णवञ्च राजसाः स्वर्गदा मताः॥
गौतमं वार्हस्पत्यञ्च संवर्त्तञ्च यमं स्मृतम्।
सांख्यं चौशनसं देवि तामसा निरयप्रदाः॥
किमत्र बहुनोक्तेन पुराणेषु स्मृतिष्वपि।
तामसा नरकायैव वर्जयेत्तान् विचक्षणः॥
अतो हि राजसं कर्म्म तामसञ्च वरानने।
प्राणान्ते नैव कुर्य्याद्वै विवेकी तत्त्वविन्नरः॥
विना तु सात्त्विकं कर्म्म यथामाधारणं हरेः।
कदाचिद्राजसं कार्य्यं मानसैस्तामसं न तु॥
श्रुतिस्मृतिपुराणोपुरःशिवागमेषु च।
संहितातन्त्रशास्त्रेषु गिरिजे यामलादिषु।
पञ्चरात्रादिष्वपीह सारो यः सात्त्विको मतः॥"
इति पाद्मोत्तरखण्डे ४२ अध्यायः॥

स्मृतिमान्, [त्] त्रि, (स्मृतिर्व्विद्यतेऽस्येति। स्मृति+मतुप्।) स्मृतिविशिष्टः। चिन्तावान्। (यथा, मनुः। ७।६४।
"अनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालवित्।
वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते॥")

स्मृतिविरुद्धः, त्रि, (स्मृतेर्व्विरुद्धः।) धर्म्मशास्त्रविपरीतः। यथा, कूर्म्मपुराणे हिमालयं प्रति देवीवाक्यम्।
"यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च।
श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां हि तामसी॥
करालभैरवञ्चैव यामलं नाम यत् कृतम्।
एवमादीनि चान्यानि मोहनार्थानि तानि वै॥
मया सृष्टानि चान्यानि मोहायैषां भवार्णवे॥"
इति मलमासतत्त्वम्॥

स्मृतिशास्त्रं, क्ली, (स्मृतिरेव शास्त्रम्।) धर्म्मसंहिता। यथा, एकादशीतत्त्वधृतभविष्यपुराणवचनम्॥
"स्मृतिशास्त्रे विकल्पस्तु आकाङ्क्षापूरणे सति॥"

स्मृतिहेतुः, पुं, (स्मृतेर्हेतुः।) स्मरणकारणम्। तत्पर्य्यायः। वासना २ संस्कारः ३ भावना ४। इति जटाधरः॥

स्मृत्यपेतः, त्रि, (स्मृतेरपेतः।) स्मृतिविरुद्धः। इति केचित्॥

स्मेरः, त्रि, (स्मि ङ ईषद्धसने+"नमिकम्पिस्म्यजसकमहिंसदीपो रः।" ३।२।१६७। इति रः।) विकशितः। इति हेमचन्द्रः॥ (यथा, साहित्यदर्पणे। ३।१००।
"कान्तिः काञ्चनचम्पकप्रतिनिधिर्व्वाणी सुधास्पर्द्धिनी॥
स्मेरेन्दीवरदामसोदरवपुस्तस्याः कटाक्षच्छटा॥")
ईषद्धसनशीलः। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, कुमारे। ५।७०।
"इयञ्च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्य्यया।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति॥")

स्मेरविष्किरः, पुं, (स्मेरः प्रफुल्लः विष्किरः पक्षी।) मयूरः। इति केचित्॥

स्यदः, पुं, (स्यन्द+घञ्। "स्यदो जवे।" ६।४।२८। इति निपातनात् साधुः।) वेगः। इत्यमरः। १।१।६७॥

स्यन्द, ऊ ङ व ल स्रुतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आ०-सक०-वेट्।) अन्तःस्थाद्ययुक्तः। ऊ, असस्यन्दिष्ट असयन्त। ङ, स्यन्दते। व, स्यन्त्स्यति स्यन्दिष्यति। ल, अस्यदत्। स्रुतिः क्षरणम्। प्रस्यन्दन्मदगन्धलुब्धमधुपेत्यत्र गणकृतानित्यत्वमिति रमानाथः। वस्तुतस्तु प्रस्यन्दते प्रस्यन्दः पचादित्वादच् ततः प्रस्यन्द इवाचरतीति क्वौ शत्रन्तम्। इति दुर्गादासः॥

स्यन्दः, पुं, स्यन्दनम्। स्यन्दधातोर्घञ् प्रत्ययेन निष्पन्नः॥ (यथा, राजतरङ्गिण्याम्। १।२४।
"तदमन्दमजस्रस्यन्दसुन्दरेयं निपीयताम्।
श्रोत्रशुक्तिपुटैः स्पष्टसङ्गराजतरङ्गिणी॥"
रोगविशेषः। यथा, सुश्रुते। २।४६।
"स्यन्दाग्निसादच्छर्द्दादीनामयान् जनयेद्दृढन्
स्वेदोद्गमः। इति श्रीधरस्वामी॥ यथा, भागवते। ५।११।८।
"यथोदिते तस्य समानसूत्रनिपाते निक्षोभति यत्र क्वचन स्यन्देनाभितपतीति॥")

स्यन्दनं, क्ली, (स्यन्द+ल्युट्।) क्षरणम्। (स्यन्दते इति। स्यन्द+"बहुलमन्यत्रापि।" उणा० २।७८। इति युच्।) जलम्। इति मेदिनी॥ गमनञ्च॥

स्यन्दनः, पुं, (स्यन्दते चलतीति। स्यन्द+युच्।) चक्रयुक्तयुद्धप्रयोजनयानम्। रथ इति ख्यातम्। (यथा, रघुः। १।३६।
"स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव॥")
तिनिशवृक्षः। इत्यमरः। २।४।२६॥ वृत्तार्हद्विशेषः। इति हेमचन्द्रः॥ वायुः। इति केचित्॥ शीघ्रे, त्रि॥ (स्यन्दके, च त्रि॥ यथा, कथासरित्सागरे। १०३।६२।
"सद्भिः परिवृतं चन्द्रमवतीर्णमिवाम्बरात्।
रूपोपमानमन्येषामस्तस्यन्दनं दृशोः॥")

स्यन्दनद्रुमः, पुं, (स्यन्दन एव द्रुमः।) तिनिशवृक्षः। इति शब्दरत्नावली॥

स्यन्दनारोहः, पुं, (स्यन्दनमारोहतीति। आ+रुह+अण्।) रथस्थितयोद्धा। रथी। इत्यमरः। २।८।६०॥

स्यन्दनिः, पुं, तिनिशवृक्षः। इति रत्नमाला॥

स्यन्दनी, स्त्री, (स्यन्दते इति। स्यन्द+ल्युः। ङीप्।) लाला। इति राजनिर्घण्टः॥ मूत्रनाड़ीति केचित्॥

स्यन्दिनी, स्त्री, (स्यन्दते इति। स्यन्द+णिनिः। ङीप्।) लाला। इत्यमरः। २।६।६७॥

स्यन्दी, [न्] त्रि, स्रवति यः। स्रावकः। स्यन्दधातोर्णिन्प्रत्ययेन निष्पन्नः। इत्यमरटीकायां रामाश्रमः॥ (यथा, उत्तररामचरिते १ अङ्के।
"जीवयन्निव ससाध्वसश्रम-
स्वेदबिन्दुरधिकण्ठमर्प्यताम्।
बाहुरैन्दवमयूखचुम्बित-
स्यन्दिचन्द्रमणिहारविभ्रमः॥")

स्यन्नः, त्रि, (स्यन्द+क्तः।) स्रुतः। इत्यमरः। ३।१।९२॥ (यथा, भट्टिः। ५।८३।
"अथायास्यन् कषायाक्षः स्यन्नस्वेदकणोल्बणः।
सन्दर्शितान्तराकूतस्तामवादीद्दशाननः॥")

स्यन्नवीणः, त्रि, (स्यन्ना वीणा यत्र।) स्रुतः। इति हेमचन्द्रः॥

स्यम, उ ण श ध्वनौ। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट् क्त्वावेट्।) अन्तःस्थादियुक्तः। उ, स्यमित्वा स्यान्त्वा। ण, सियमतुः सस्यमतुः। श, स्यमती स्यमन्ती। इति दुर्गादासः॥